**B** SL. No. : S

ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 50 ]
Total No. of Questions : 50 ]

**CCE RR**
**UNREVISED**

[ ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8
[ Total No. of Printed Pages : 8

ಸಂಕೇತ ಸಂಖ್ಯೆ: **16-S** **Code No. : 16-S**

# ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : First Language — SANSKRIT
# प्रथम भाषा — संस्कृतम्

**( ಹಳೆ ಪಠ್ಯಕ್ರಮ / Old Syllabus )**

**( ಪುನರಾವರ್ತಿತ ಶಾಲಾ ಅಭ್ಯರ್ಥಿ / Regular Repeater )**

ದಿನಾಂಕ : 25. 06. 2019 ] [ Date : 25. 06. 2019
ಸಮಯ : ಬೆಳಗ್ಗೆ 9-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 12-30 ರವರೆಗೆ ] [ Time : 9-30 A.M. to 12-30 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

## *ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 50 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

## परीक्षार्थिनां सामान्यसूचनाः

1. अस्मिन् प्रश्नपत्रे पञ्चाशत् (50) वस्तुनिष्ठाः व्यक्तिनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

इतः कर्तयत

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

Tear here

# भागः - A

**( गद्य-पद्य-पूरकपाठाः )**

**( 62 अङ्काः )**

I. एकवाक्येन उत्तरं लिखत — 11 × 1 = 11

1. इन्द्रः कस्य तपोवनं वव्राज ?
2. विज्ञानप्रदर्शिनी कुत्र आयोजिता ?
3. सत्यव्रतशास्त्रिमहाभागः कुत्र अजायत ?
4. चन्नम्मायाः पतिः कः ?
5. अघोरसंज्ञः कः ?
6. काः समुद्रे अस्तं गच्छन्ति ?
7. शैलशृङ्गवासिनी का ?
8. अञ्जनायाः पतिः कः ?
9. पाण्डवेषु कः राजपदवीम् अलभत ?
10. दीर्घायुः केन लभ्यते ?
11. धृतराष्ट्रः कस्य पिता ?

II. चतुर्थपदं लिखत — 4 × 1 = 4

12. नागार्जुनः – रसरत्नाकरः :: चरकः – ..........................।
13. कुरुराजः – दुर्योधनः :: कुरुसेनापतिः – ........................... ।
14. सीतास्वयंवरम् – काव्यम् :: गुरुशापम् – ........................... ।
15. निर्भाग्या – सुनीतिः :: सुन्दरीयुवतिः – ........................... ।

III. लघूत्तराणि संस्कृतभाषया लिखत – 4 × 2 = 8

16. सूर्यस्य विषये तैत्तिरीये किं लिखितमस्ति ?

17. संस्कृतभाषाविषये डा० सत्यव्रतशास्त्रिमहोदयस्य आशयः कः ?

18. रमारमणस्य कर्णसरणिम् आगता अशरीरिणीवाणी का ?

19. नरस्य वृत्तं के जानन्ति ?

**अथवा**

भिषजः रोगस्वरूपं, रोगनिदानं च कथं जानन्ति ?

IV. श्लोकतात्पर्यं कर्णाटकभाषया, आङ्ग्लभाषया, संस्कृतभाषया वा लिखत – 2 × 2 = 4

20. न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न-बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुरणो न हन्यते-हन्यमाने शरीरे ।।

21. ततो गिरौ पपातैष इन्द्रवज्राभिताडितः ।
पतमानस्य चैतस्य वामो हनुरभज्यत ।।

**अथवा**

अहमस्य प्रदास्यामि परमं वरमद्भुतम् ।
इतः प्रभृति वज्रस्य ममावध्यो भविष्यति ।।

V. कव्योः देश-काल-कृतीनां विषये लिखत – 2 × 3 = 6

22. बल्लाळसेनः ।

23. वाल्मीकिः ।

VI. यथानिर्देशम् उत्तरं लिखत – 3 × 3 = 9

24. याचको भूत्वा अत्र अहम् आगतः ।
कः पाठः ? कम् अवदत् ? याचकरूपेण कः आगतः ?

25. सागर इव तिष्ठतु ते यशः ।
कः पाठः ? कः अवदत् ? कस्य यशः ?

26. किंस्वित् श्रेष्ठतरं भवेत् ?
कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

**अथवा**

रसे गन्धे न रज्यते ।
कः पाठः ? कः अवदत् ? कः न रज्यते ?

VII. दशवाक्यैः उत्तरं कर्णाटकभाषया, आङ्गलभाषया, संस्कृतभाषया वा लिखत – 3 × 4 = 12

27. चन्नम्माराजारामयोः सम्भाषणं लिखत ।

28. नाट्यांशान् सङ्गृह्य लिखत ।

29. 'भारत रक्षितुं सन्नद्धः योद्धा हिमवान्' कथम् ? विवृणुत ।

**अथवा**

ध्रुवकथां सङ्गृह्य लिखत ।

VIII. श्लोकं पूरयत – 1 × 4 = 4

30. क्षारं जलं ..............................................................................................

..................................................................................................।

..................................................................................................

.................................................................................. समुद्गिरन्ति ।।

IX. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत – 4 × 1 = 4

31. अयोध्यायाः राजा दशरथः आसीत् । तस्य चत्वारः पुत्राः आसन् । तेषु ज्येष्ठः पुत्रः श्रीरामः । तस्य माता कौसल्या । रामः बाल्यादेव चतुरमतिः, शूरः, दयालुः च अवर्तत । तस्य पराक्रमम् ज्ञात्वा विश्वामित्रमहर्षिः दशरथस्य समीपम् आगच्छत् । स्वस्य यज्ञस्य रक्षणार्थं श्रीरामं प्रेषयितुम् अयाचत । दशरथस्य कुलगुरुः वसिष्ठः आसीत् । वसिष्ठस्य वचनानुसारं रामलक्ष्मणौ विश्वामित्रेण सह दशरथः प्रेषयामास ।

i) दशरथस्य कति पुत्राः आसन् ?

ii) रामस्य माता का ?

iii) दशरथस्य कुलगुरुः कः ?

iv) श्रीरामः कथम् अवर्तत ?

## भागः - B

### (व्याकरणविभागः)

### (22 अङ्काः)

X. निम्नलिखितेषु प्रश्नेषु अपूर्णविवरणेषु वा प्रत्येकं चत्वारः विकल्पाः प्रदत्ताः । तेषु एकः एव शुद्धः उपयुक्तः वा वर्तते । सम्यक् उत्तरस्य चयनं कृत्वा क्रमाक्षरेण-सह लिखत — $10 \times 1 = 10$

32. 'अचलः' – अस्य समानार्थकपदम् इदं भवति –

(A) वृक्षः (B) पर्वतः

(C) समुद्रः (D) भूमिः ।

33. 'विफलम्' – अस्य विरुद्धार्थकपदम् इदं भवति –

(A) अफलम् (B) सुफलम्

(C) आफलम (D) सफलम् ।

34. 'तैरपि' – अत्र एषः सन्धिः भवति –

(A) विसर्गसन्धिः (B) गुणसन्धिः

(C) वृद्धिसन्धिः (D) यण्सन्धिः ।

35. 'योगी' – अस्य अन्यलिङ्गरूपम् इदं अस्ति –

(A) योगिनि (B) योगाः

(C) योगिनी (D) वियोगी ।

36. 'तव' – अत्र एषा विभक्तिः वर्तते –

(A) प्रथमा (B) तृतीया

(C) पञ्चमी (D) षष्ठी ।

37. 'एतदुपरि' – अत्र सन्धिविभजनम् एवं भवति –

(A) एतत् + उपरि (B) एतस्य + उपरि

(C) एतदा + उपरि (D) एतः + उपरि ।

38. अत्र समूहेतरपदम् इदं भवति –

(A) यथाशक्ति (B) विषकण्ठः

(C) यथाक्रमम् (D) यथाबलम् ।

39. 'वसन्तु' – अत्र एषः लकारः वर्तते –

(A) लट् (B) लृट्

(C) लिट् (D) लोट् ।

40. उभयपदार्थप्रधानः एषः समासः –

(A) तत्पुरुषः (B) अव्ययीभावः

(C) द्वन्द्वः (D) बहुव्रीहिः।

41. एषु व्याकरणशुद्धं वाक्यम् इदं भवति –

(A) बालिका बिडालात् बिभेति (B) बालिका बिडाले बिभेति

(C) बालिका बिडालेन बिभेति (D) बालिका बिडालस्य बिभेति ।

42. प्रयोगपरिवर्तनं कुरुत – $2 \times 1 = 2$

a) अहं जलं पीतवान् ।

b) रामेण फलं खाद्यते ।

43. रेखाङ्कितपदम् अवलम्ब्य प्रश्ननिर्माणं कुरुत – $2 \times 1 = 2$

a) <u>पुरुषकारेण</u> विना दैवं न सिध्यति ।

b) <u>शक्रः</u> दधीचेः तपोवनम् आगच्छति ।

44. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत – $2 \times 1 = 2$

a) रमेशः श्लोकार्थं ज्ञातवान् ।

b) पुष्पेण विकसितव्यम् ।

XI. वाक्ये विद्यमानं अलङ्कारं सलक्षणं विवृणुत – $1 \times 3 = 3$

45. सैन्धवम् आनय ।

XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत – $1 \times 3 = 3$

46. पुराणमित्येव न साधु सर्वम् ।

# भागः - C

## (रचनाविभागः)

## (16 अङ्काः)

XIII. संस्कृतभाषया अनुवादं कुरुत — 1 × 3 = 3

47. ವಿಶ್ವದಲ್ಲಿ ಅನೇಕ ಭಾಷೆಗಳಿವೆ. ವ್ಯವಹಾರದ ಪ್ರಮುಖ ಸಾಧನವೇ ಭಾಷೆಯಾಗಿದೆ. ಭಾಷೆಯಿಲ್ಲದೇ ಜೀವನವು ಕಷ್ಟಸಾಧ್ಯವು.

There are many languages in this world. Language is an important means of communication. Life is difficult without language.

XIV. कर्णाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत — 1 × 3 = 3

48. भारतदेशे अनेकानि पुण्यक्षेत्राणि सन्ति । तेषु मानससरः अपि अन्यतमम् । अत्रत्यः परिसरः सुन्दरः वर्तते ।

XV. पत्रं लिखत — 1 × 5 = 5

49. धारवाडनगरस्य विवेकानन्दविद्यालयस्य वीणा / वसन्तः इति मत्वा दिनद्वयस्य विरामं सम्प्रार्थ्य कक्ष्याध्यापकं प्रति पत्रं लिखत ।

**अथवा**

धारवाडनगरस्य विवेकानन्दविद्यालयस्य वीणा / वसन्तः इति मत्वा 'मेघदूतम्' इति पुस्तकं प्रेषयितुं निवेद्य देहलीनगरस्य रमणप्रकाशनस्य व्यवस्थापकं प्रति आवेदनपत्र लिखत ।

XVI. 50. एकं विषयम् अधिकृत्य प्रबन्धं लिखत — 1 × 5 = 5

i) समाचारपत्रम्

ii) सङ्गणकयन्त्रम्

iii) स्त्रीशिक्षणम् ।